**भूत्तम** न० भुवि उत्तमम् । सुवर्णे हेमच० ।

**भूदरीभवा** स्त्री० भूदर्य्यां भूमिबिले भवति भू-अच् । आखु-कर्ण्याम् (उन्दरकानि) भावप्र० ।

**भूदार** पुंस्त्री० भुवं दृणाति खनति मुस्ताद्यर्थम् दृ-अण् । शूकरे अमरः स्त्रियां जातित्वात् ङीष् ।

**भूदेव** पु० भुवि देव इव । विप्रे अमरः । भूसुरादयोऽप्यत्र

**भूधन** पु० भूरेव धनमस्य । नृपे हेमच० ।

**भूधर** पु० भुवं धरति धृ-अच् । पर्वते अमरः ।

**भूध्र** पु० भुवं धरति धृ-क । महीध्रे पर्वते हेमच० ।

**भूधात्री** स्त्री भुवि लग्ना धात्री आमलकी शाक०त०। भूम्या-मलक्याम् राजनि० ।

**भूनाग** पु० भुवि नाग इव । उपरसभेदे राजनि०। [राजनि०

**भूनिम्ब** पु० भुवि लग्नः निम्बः शाक०त०। (चिराता) क्षुपभेदे

**भूनिम्बाद्य** न० चक्रदत्तोक्ते औषधभेदे "भूनिम्बकटुका व्योषमुस्तकेन्द्रयवान् समान् । द्वौ चित्रकात् वत्सक-त्वग्भागान् षोडश चूर्णयेत् । गुडशीताम्बुना पीतं ग्रहणीदोषगुल्मनुत् । कामलाज्वरपाण्डुत्वमेहारु-च्यतिसारनुत् । गुडयोगाद् गुडाम्बु स्याद् गुडवर्ण रसान्वितम्" ।

**भूनीप** पु० भुवि लग्नो नीपः शाक०त०। भूमिकदम्बे राजनि०

**भूप** पु०भुवं पाति पा-क । भूमिपाले अमरः भूमिपादयोऽप्यत्र ।

**भूपति** पु० ६त० । नृपे भूमिपत्यादयोऽप्यत्र ।

**भूपद** पु० भुवि पदं मूलं यस्य । १वृक्षमात्रे शब्दच०। २मल्लि-कायां स्त्री० ङीष् अमरः ।

**भूपरिधि** पु० ६त० । भूमेः परिधौ तन्मानं सू०सि० उक्तं यथा "योजनानि शतान्यष्टौ भूकर्णो द्विगुणानि तु । तद्वर्गतो दशगुणात् पदं भूपरिधिर्भवेत्" "लम्बज्याघ्नस्त्रि-जीवाप्तः स्फुटो भूपरिधिः स्वकः" । सि०शि०सूक्ष्मतया-न्यथोक्तं यथा "प्रोक्तो योजनसंख्यया कुपरिधिः सप्ताङ्ग-नागाब्धय ४९६७ स्तद्व्यासः कुभुजङ्गसायकभुवः सिद्धां-शकेनाधिकः १५८१।१/२४ । पृष्ठक्षेत्रफलं तथा युग-गुणत्रिंशच्छराष्टाद्रयो ७८५३०३४ भूमेः कन्दुकजालवत् कुपरिधिव्यासाहतेः प्रस्फुटम्" । [रत्नमा०

**भूपलाश** पु० भुवि पलाशं यस्य । विशल्यकारके क्षुपभेदे

**भूपाटलि** भुवि ख्याता पाटलिः । भूतालीवृक्षे राजनि० ।

**भूपाल** पु०भुवं पालयति पालि-अण् उप०स०। भूपतौ शब्दमा०

**भूपुत्र** पु० ६त० । १मङ्गले २नरकासुरे च । ३जानक्यां स्त्री शब्दर० गौ० ङीष् ।

**भूपुर** न०भूरिव पुरम् । यन्त्रबहिःस्थे रेखासन्निवेशविशेषयुते भूम्याकारे स्थाने ।

**भूपेष्ट** पु० भूपस्येष्टः । राजादनीवृक्षे (पियाशाल) राजनि० तद्बीजस्य चिरञ्जि इति ख्यातस्य राजप्रियत्वात्तथात्वम् ।

**भूबदरी** स्त्री भुवि ख्याता बदरी । क्षुद्रकोल्यां राजनि० ।

**भूबल** न० नरपतिजयचर्य्योक्ते जयसाधनोपाये बलभेदे "स्वरोदयैश्च चक्रैश्च शकुनैश्च समोऽधिकः । तत्र युद्धे बलं ज्ञेयं भूबलानां जयार्थिनाम् । तेषां नामानि वक्ष्ये-ऽहं ख्यातानि ब्रह्मयामले । चतुरशीतिसंख्यानां यद्-बलेन जयी रणे । उड्डी जालन्धरी पूर्णा कामा कोल्लु कवीरिका । शिवोग्रा च महामारी क्षेत्रपाली च वंशजा । रुद्रकालानलं प्रोक्तं कालरेखा निरा-मया । जयलक्ष्मीर्महालक्ष्मीर्जया विजयभैरवी । बाला योगेश्वरी चण्डी व्योमाम्बुभूककर्त्तरी । शार्दूली सिंहली तन्वी महामाया महेश्वरी । देवकोटी शिवा शक्तिरिष्टा माला वराटिका । त्रिखण्डा मतृसरी धर्मा स्तुता हृष्टाजयाऽजया । दुर्मती प्रवरा गौरी काली नरहरी मता । खेचरी भूचरी गुह्या द्वादशी विष्टि केवला । त्रैलोक्यविजया काली कराला क्षुद्रया परा । रौद्री च शिशुमातङ्गी अभेद्या दहनी जिता । ब्रह्मला वर्णभूमिश्च कापाली त्वमिलानला । चन्द्रार्कबिम्बभूमी च पञ्चभूराशिलग्नगा । राहुकालानली भूमिः स्वर् भूमिर्द्विधा मता । रुद्रत्रिकालिकाश्चैव राहुश्चाष्टविध-स्तथा । चन्द्रः सप्तविधः सूर्य्यश्चतुर्धा योगिनी त्रिधा । कालवेला त्रिभेदा च तिथिनक्षत्रवारगा । इमानि भूबलान्यत्र ज्ञात्वा यः प्रविशेत् रणे । अरयस्तस्य नश्यन्ति मेघा वातहता यथा । सप्तमात्राधिके नास्ति स्वरैश्चक्रैश्च भूबलैः । स्थानसैन्याधिके शूरो बलविज्ञान-संयुते" । एतल्लक्षणानि तत्र दृश्यानि ।

**भूभर्त्तृ** पु० याजका० ६त०। भूमिपतौ भूमिभर्त्त्रादयोऽप्यत्र ।

**भूभुज्** पु० भुवं भुङ्क्ते भुनक्ति पालयति वा भुज-क्विप् । भूपाले जटा० । [१पर्वते, २भूपाले च मेदि० ।

**भूभृत्** पु० भुवं बिभर्त्ति धारयति, पालयति वा भृ क्विप् ।

**भूमण्डल** त्रि० ६त० । मण्डलाकारे भूमिभागे ।

**भूमन्** पु० बहोर्भावः बहु+इमनिच् "बहोर्लोपो भू च बहोः" इलोपे भ्वादेशः । १बहुत्वे अतिशये स्वार्थे इमनिच् प्राग्वत् २अतिशयबहुत्वयुते च । "यो वै भूमा तत्सुखं नाल्पे सुखमस्ति भूमैव सुखं भूमा त्वेव विजिज्ञासि-